वंशजा, स्त्री, (वंशे जायते इति । जन्+डः+टाप् ।) वंशरोचना । इति शब्दरत्नावली ॥ (अस्या गुणा: यथा,—
"वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला ।
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वंशतण्डुल:, पुं, (वंशजातस्तण्डुल: ।) वेणुयव: । इति राजनिर्घण्ट: ॥

वंशधान्यं, क्ली, (वंशस्य धान्यम् ।) वेणुयव: । इति राजनिर्घण्ट: ॥

वंशनालिका, स्त्री, (वंशनालोऽस्त्यस्या इति । वंशनाल+ठन् । टाप् ।) वंशी । इति शब्दरत्नावली ॥

वंशनेत्रं, क्ली, (वंशस्येव नेत्राण्यस्य ।) इक्षुमूलम् । इति राजनिर्घण्ट: ॥

वंशपत्र:, पुं, (वंशस्य पत्राणीव पत्राण्यस्य ।) नल: । इति राजनिर्घण्ट: ॥ (वंशस्य पत्रम् ।) वंशस्य दले, क्ली ॥ (हरितालम् । यथा,—
"तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दध्यम्लेन च वा पुन: ॥
शोधयित्वा पुन: शुष्कं चूर्णयेत्तण्डुलाकृति ।
तत: शरावके पात्रे स्थापयेत् कुशलो भिषक् ॥
वदरीपत्रकल्केन सन्धिलेपञ्च कारयेत् ।
अरुणाभमध:पात्रं तावज्ज्वाला प्रदीयते ॥
स्वाङ्गशीतं समुद्धृत्य माणिक्याभो भवेद्रस: ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे कुष्ठाधिकारे ॥)

वंशपत्रकं, क्ली, (वंशपत्रमेव । स्वार्थे कन् ।) हरितालम् । इति हेमचन्द्र: । ४ । १२४ ॥

वंशपत्रक:, पुं, (वंशस्य पत्रमिवाकृतिरस्यति । इवार्थे कन् ।) क्षुद्रमत्स्यविशेष: । इति शब्दमाला ॥ वाँशपाता माछ इति भाषा ॥ नल: । श्वेतेक्षु: । इति राजनिर्घण्ट: ॥

वंशपत्रपतितं, क्ली, सप्तदशाक्षरपादच्छन्दोविशेष: । यथा,—
"दिङ्मुनिवंशपत्रपतितं भ र न भ न ल गै: ॥"
उदाहरणम् ।
"नूतनवंशपत्रपतितं रजनिजलवं
पश्य मुकुन्द ! मौक्तिकमिवोत्तममरकतगम् ।
एष च तं चकोरनिकर: प्रपिबति मुदितो
वान्तमवेत्य चन्द्रकिरणैरमृतकणमिव ॥"
वंशपत्रचरितेति केचित् । वंशदलमिति शम्भौ । इति छन्दोमञ्जरी ॥

वंशपत्री, स्त्री, (वंशपत्र+गौरादित्वात् ङीष् ।) नाड़ीहिङ्गु: । तृणविशेष: । तत्पर्य्याय: । वंशदला २ जीरिका ३ जीर्णपत्रिका ४ । अस्या गुणा: । सुमधुरत्वम् । शिशिरत्वम् । पित्तरक्तदोषनाशित्वम् । रुच्यत्वम् । पशूनां दुग्धदायित्वञ्च । इति राजनिर्घण्ट: ॥ तत्पर्य्यायगुणा: ।
"वंशपत्री वेणुपत्री पिण्डा हिङ्गु शिवाटिका ।
हिङ्गुपत्रीगुणा विज्ञैर्वंशपत्री च कीर्त्तिता ॥"
इति भावप्रकाश: ॥

वंशपीत:, पुं, (वंश: वंशपत्रमिव पीत: ।) कणगुग्गुलु: । इति राजनिर्घण्ट: ॥

वंशपुष्पा, स्त्री, (वंशस्य पुष्पाणीव पुष्पाणि यस्या: ।) सहदेवीलता । इति राजनिर्घण्ट: ॥

वंशपूरकं, क्ली, (वंशस्येव पूरकमस्य ।) इक्षुमूलम् । इति राजनिर्घण्ट: ॥

वंशरोचना, स्त्री, (रोचते इति । रुच+नन्द्यादित्वात् ल्यु: । टाप् । वंशस्य रोचना ।) स्वनामख्यातवंशपर्व्वस्थितश्वेतवर्णौषधविशेष: । वंशलोचन इति भाषा । तत्पर्य्याय: । त्वक्क्षीरा २ । इत्यमर: । २ । ६ । १०६ ॥ वंशलोचना ३ । इति भरत: ॥ तुगाक्षीरी ४ शुभा ५ वांशी ६ वंशजा ७ । इति रत्नमाला ॥ क्षीरिका ८ । इति शब्दरत्नावली ॥ तुगा ९ त्वक्क्षीरी १० शुभ्रा ११ वंशक्षीरी १२ वैणवी १३ त्वक्सारा १४ कर्म्मरी १५ श्वेता १६ वंशकर्पूररोचना १७ तुङ्गा १८ रोचनिका १९ पिङ्गा २० वंशशर्करा २१ । अस्या गुणा: । रूक्षत्वम् । कषायत्वम् । मधुरत्वम् । हिमत्वम् । रक्तशुद्धिकारित्वम् । तापपित्तोद्रेकहरत्वञ्च । इति राजनिर्घण्ट: ॥ अपि च ।
"वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला ।
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामला: ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित् ॥"
इति भावप्रकाश: ॥

वंशलोचना, स्त्री, (वंशरोचना । रस्य ल: ।) वंशरोचना । इति हेमचन्द्र: ॥ अस्या गुणा: ।
"कषायमधुरा रूक्षा वातघ्नी वंशलोचना ।
तुगाक्षीरी क्षयश्वासकासघ्नी मधुरा हिमा ॥"
इति राजवल्लभ: ॥

वंशशर्करा, स्त्री, (वंशस्य शर्करेव ।) वंशलोचना । इति राजनिर्घण्ट: ॥

वंशशलाका, स्त्री (वंशस्य शलाकेव दार्ढ्यात् ।) वीणामूलम् । इति हेमचन्द्र: । २ । २०० ॥ (वंशनिर्म्मिता शलाकेति मध्यलोपी समास: ।) वंशनिर्म्मितशलाका च ॥

वंशस्तनितं, } वंशस्थविलं, } क्ली, द्वादशाक्षरपादच्छन्दोविशेष: । यथा,—
"वदन्ति वंशस्थविलं जतौ जरौ ॥"
उदाहरणम् ।
"विलासवंशस्थविलं मुखानिलै:
प्रपूर्य्य य: पञ्चमरागमुद्गिरन् ।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरि: पुनातु व: ॥"
वंशस्तनितमपि क्वापि । इति छन्दोमञ्जरी ॥

वंशाग्रं, क्ली (वंशस्य अग्रम् । प्रथमजातत्वात् ।) वंशाङ्कुर: । इति राजनिर्घण्ट: ॥

वंशानुचरितं, क्ली, (वंशस्य अनुचरितम् ।) वंशचरित्रवर्णनम् । तत्तु पुराणस्य पञ्चलक्षणान्तर्गतलक्षणविशेष: । यथा, शब्दरत्नावल्याम् ।
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम् ॥"
(यथा, भागवते । ६ । १ । ४ ।
"तेषां वंशं पृथग्ब्रह्मन् ! वंशानुचरितानि च ।
कीर्त्तयस्व महाभाग ! नित्यं शुश्रूषतां हि न: ॥")

वंशाङ्कुर:, पुं, वंशस्याङ्कुर: । वाँशेर कोँड़ा इति भाषा । तत्पर्य्याय: । करीरम् २ वंशाग्रम् ३ यवफलाङ्कुर: । अस्य गुणा: । कटुत्वम् । तिक्तत्वम् । अम्लत्वम् । कषायत्वम् । लघुत्वम् । शीतलत्वम् । पित्तास्रदाहकृच्छ्रघ्नत्वम् । रुचिकारित्वम् । तत्पर्व्वणो निर्गुणत्वञ्च । इति राजनिर्घण्ट: ॥

वंशिकं, क्ली, (वंशोऽस्त्यस्येति । ठन् ।) अगुरु । इत्यमर: । २ । ६ । १२६ ॥

वंशिका, स्त्री, (वंशिक+टाप् ।) अगुरु । इत्यमरटीकायां भरत: ॥ वंशी । इति शब्दरत्नावली ॥

वंशी, स्त्री, (वंश: कारणत्वेनास्त्यस्या: । अच् । गौरादित्वात् ङीष् ।) मुरली । इति शब्दरत्नावली ॥ वाँशी इति भाषा ॥ (यथा, काव्यचन्द्रिकायाम् ।
"निर्म्मिता कापि गोपीनां कुलशीलविनाशिनी ।
विधिना पामरेणेयं न वंशी मुरवैरिण: ॥")
कर्षचतुष्टयम् । इति राजनिर्घण्ट: ॥ वंशीवाद्यस्य विवरणम् । यथा,—
"तालेन राजते गीतं तालो वादित्रसम्भव: ।
गरीयस्तेन वादित्रं तच्चतुर्व्विधमुच्यते ॥
ततं शुषिरमानद्धं घनमित्थं चतुर्व्विधम् ।
ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा ।
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम् ॥"
शुषिरं यथा,—
"वंशोऽथ पारीमधुरीतित्तिरीशङ्खकाहला: ।
तोड़हीमुरलीबुक्काश्टङ्गिकास्वरनाभय: ॥
शृङ्गं कापालिकं वंशश्चर्म्म वंशस्तथा पर: ।
एते शुषिरभेदास्तु कथिता: पूर्व्वसूरिभि: ॥
वर्त्तुल: सरलश्चैव पर्व्वदोषविवर्ज्जित: ।
वैणव: खादिरो वापि रक्तचन्दनजोऽथवा ॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा ।
राजतस्ताम्रजो वापि लौहज: स्फाटिकोऽथवा ॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभित: ।
शिल्पविद्याप्रवीणेन वंश: कार्य्यो मनोहर: ॥
वंशेनैव मतोऽपीति मतङ्गमुनिनोदितम् ।
ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिता: ॥
तत्र त्यक्त्वा शिरोदेशादधो द्व्यमितमङ्गुलम् ।
फुत्काररन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा ॥
पञ्चाङ्गुलानि संत्यज्यताररन्ध्राणि कारयेत् ।
कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात् ॥
वदरीबीजतुल्यानि संत्यज्यार्द्धार्द्धमङ्गुलम् ।
प्रान्तयोर्ब्बन्धनं कार्य्यं स्वराद्यैर्नादहेतवे ॥
सिक्थकेन कला देया तेन सुस्वरता भवेत् ।
पञ्चाङ्गुलोऽयं वंश: स्यादेकैकाङ्गुलिवर्द्धित: ॥
षड़ङ्गुलानि नाम्ना स्यात् यावदष्टादशाङ्गुलम् ।
फुत्कारताररन्ध्रस्य यावदङ्गुलिमन्तरम् ।
तदेव नाम वंशस्य वांशिकै: परिकीर्त्तितम् ॥